दिनाङ्क : 09/07/2025 सायम् - 06:20

**इयम् आकाशवाणी**

## आदौ-मुख्यवार्ता:

- भारतनामाबिया-देशयोर्मध्ये उद्यमिताविकास-केन्द्रस्य स्थापनायै चिकित्सौषधि-क्षेत्रे सहयोगाय च सन्धिज्ञापने हस्ताक्षराणि जातानि।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य रात्रौ विण्डहोक् इत्यत्र नामिबियायाः संसत्-सत्रं सम्बोधयिष्यति , नामीबियायाः सर्वोच्च-नागरिकसम्मानम् अपि अधिगमिष्यति ।
- गुजरातस्य वडोदरा-जनपदे जातायां सेतुविखण्डनस्य घटनायां नवसंख्याकाः जनाः मारिताः बह्वश्च व्रणिताः सञ्जाताः। राज्यसर्वकारेण अन्वीक्षणादेशः प्रदत्त ।
- मानसून् इत्यस्य स्थितिः मध्य-भारतीय-क्षेत्रेषु आगामिषु चतुर्पञ्चदिवसेषु अपि निरन्तरतां प्राप्स्यति ।
- महिलानां क्रिकेटक्रीडायां चतुर्थे द्वन्द्वे मानचेस्टर इत्यस्य ट्रैफोर्ड-ग्राउंड इत्यत्र भारतीयदलं इंग्लैण्डदलम् अद्य रात्रौ सम्मुखीकरिष्यति ।

## अथ वार्ताः विस्तरेण

### प्रधानमंत्री-नामीबिया-यात्रा

प्रधानमंत्री नरेंद्रमोदी अद्य राजधान्यां विंडहोक-स्थिते स्टेटहाउस इत्यत्र नामीबियायाः राष्ट्रपतिना नेटुम्बो-नंदी-नदैतवा इत्यनेन सह प्रतिनिधिमंडलस्तरीय वार्ताम् अकरोत् । अस्याः वार्तायाः उद्देश्यं महत्वपूर्ण-क्षेत्रेषु सहयोगस्य नवीनक्षेत्राणाम् अन्वेषणं विधाय द्वयोः देशयोर्मध्ये आर्थिक-सहभागितायाः सुदृढीकरणम् आसीत् । भारतनामाबिया-देशयोर्मध्ये अद्य उद्यमिताविकास-केन्द्रस्य स्थापनायै एकस्मिन् सन्धिज्ञापने हस्ताक्षराणि जातानि । द्वयोः देशयोर्मध्ये चिकित्सौषधि-क्षेत्रे अपि सहयोग-विषयके सन्धिज्ञापने हस्ताक्षराणि जातानि । यात्राकाले प्रधानमन्त्री नामिबिया-देशस्य संस्थापकस्य तथा प्रथमराष्ट्रपतेः स्वर्गीयस्य डा. सैम-नुजोमा-वर्याय श्रद्धाञ्जलिम् अपि प्रायच्छत् । द्वैपाक्षिकसम्बन्धान् सुदृढं कर्तुं योगदानार्थं श्रीमोदी नामिबिया-देशस्य सर्वोच्च-नागरिकपुरस्कारेण सम्मानितः भविष्यति । एतदतिरिच्य, प्रधानमन्त्री नामिबिया-देशस्य संसत्-सदने अपि सम्बोधयिष्यति, यत् द्वयोः देशयोः मध्ये विद्यमानयोः सम्बन्धयोः निर्णायकं क्षणं भविष्यति। संसाधनसमृद्धे दक्षिण-आफ्रिका-देशे श्रीमोदीवर्यस्य एतत् प्रथमं भ्रमणम् अस्ति, अपि च प्रायः दशकत्रयानन्तरं भारतस्य प्रधानमन्त्रिणः तृतीयं भ्रमणम् अस्ति। इतः पूर्वं प्रातःकाले श्रीमोदी स्वस्य पञ्चराष्ट्राणां यात्रायाः अन्तिमे चरणे विण्ड्होक्-नगरं प्राप्तवान् ।

## पूर्व संध्या-गुजरात-सेतु-विखण्डनम्

गुजरातस्य मख्यमन्त्री भूपेंद्रपटेलः वडोदरा-जनपदे गंभीरा क्षेत्रस्य सन्निकटे सेतोर्विखण्डनस्य जातायाः घटनायाः अन्वीक्षणादेशं प्रायच्छत्। अवधेयं यत् अस्यां घटनायां नवजनाः मारिताः बह्वश्च व्रणिताः सञ्जाताः। श्रीपटेलः घटनायाः अस्याः संबन्धे अधिकारिभ्यः सूचनापत्रं दातुम् अकथयत् । अस्यां घटनायां पञ्चवाहनानि महीसागर-नद्यां पतितानि येन नवजनानां मृत्युरभवत्। स्थानीयाधिकारिणः बृहद्रूपेण सहायोद्धार-अभियानं प्रारभन् ।

## बिहार बंद - भाजपा:

बिहार-राज्ये, मतदातासूचिभ्यः निर्वाचनायोगस्य (एसआईआर) इति विशिष्ट-गहन-संशोधनं विरुध्य राष्ट्रिय-जनता-दलस्य कांग्रेस-दलस्य च नेतृत्वभूतेन महाग्रन्थिबंधनेन समाहूतेन राज्यव्यापि-विरोधेन अद्य मिश्रिता प्रतिक्रिया जनिता । पिधानेत्यस्य समर्थकाः केषुचित् स्थानेषु मार्गाणि अवरुद्धानि अकुर्वन् रेलसेवाः च तैः बाधिताः । यद्यपि सर्वकारीयाणि अन्यानि च प्रतिष्ठानानि सामान्यरूपेण कार्यं कुर्वन्ति स्म ।अस्मिन् मध्ये , भाजपादलस्य वरिष्ठनेता रविशंकर-प्रसादः विरोध-प्रदर्शनम अधिकृत्य विपक्षे लक्ष्यम् असाधयत् । नवदिल्ल्यां वार्ताहरान् संबोधयन् श्रीप्रसादः राजद-कांग्रेस-दलयोः नेतृत्वभूतस्य महाग्रन्थिबंधनस्य उपरि अस्मिन् विषये राजनीत्याः आरोपः प्रख्यापितः अस्ति ।

## चुरु विमानदुर्घटना

राजस्थानस्य चुरुमण्डलस्य समीपे अद्य भारतीयवायुसेनायाः विमानं दुरापन्नम् अवाप्नोत् । राजल-देसर-आरक्षिस्थानक्षेत्रे एषा घटना घटिता । चुरु-आरक्षी-अधीक्षकः जय-यादवः अवदत् यत् स्थलात् दग्धशव-द्वयं प्राप्तम् अस्ति । सः अवदत् यत् नागरिकाणां क्षतेः सूचना नास्ति।

## ऋतुविज्ञानविभागः

ऋतुविज्ञानविभागेन अद्य छत्तीसगढ-मध्यप्रदेशयोः अति वृष्टेः रेड अलर्ट इति सञ्चेतना प्रसारितास्ति। आकाशवाण्या सह चर्चायां विभागस्य वरिष्ठवैज्ञानिकः डॉ. आर.के.जेनामणिः अवदत् यत् आगामि दिनद्वयो: मध्यभारते निरन्तरं वृष्टेः सम्भावना विद्यते। विभागेन उत्तरभारते आगामिदिनद्वयं यावत् वर्षायाः कृते ऑरेंज अलर्ट इति नारङ्गवर्णीयसचेतना अपि प्रसारितास्ति। सः अवदत् यत् दिल्लीनगरे, तत्समीपस्थे च एनसीआरक्षेत्रे लघुतः मध्यमपर्यन्तं वर्षा भवितुं शक्नोति।

## प्रवर्तननिदेशालयः – डंकीरूट-प्रकरणम् :

अस्मिन् वर्षे फरवरीमासे अमेरिकादेशात् निर्वासितानां अवैधप्रवासीनां प्रकरणे डंकी-रूट इति प्रकरणस्य सन्दर्भे अद्य प्रवर्तननिदेशालयेन अमृतसर-सङ्गरुर-पटियाला-मोग्गा-अम्बला-कुरुक्षेत्र-करनाल चेत्यादिषु एकादश-स्थानेषु अन्वेषणं कृतम् अस्ति। अमेरिकादेशं प्रति गन्तुं इच्छुकानाम् विभिन्नानां जनानां ये वञ्चनं कृतवन्तः यात्रा-वीजा-मध्यस्थताकर्तृणः विरुद्धं पञ्जाब-हरियाणा-राज्ययोः आरक्षिबलैः अस्मिन् प्रकरणे अन्वेषणम् समारब्धम्।

**राणा-न्यायिकनिगडनम्**

मुम्बय्याः 26/11 इति आतङ्क्याक्रमणस्य सूत्रधारस्य तहावूर्-राणा इत्यस्य न्यायिक-निगडनं दिल्ली-न्यायालयेन अद्य अग्रिममासस्य त्रयोदश-दिनाङ्कपर्यन्तं विस्तारितम् अस्ति । यदा राष्ट्रिय-अन्वेषण-विभागः राणा इत्येतं विरुध्य पूरकम् आरोपपत्रं प्रायच्छत् तदा एव एषा कार्याचरणप्रक्रिया वृद्धिम् अधिगता।

**अमेरिका-न्यायालयः**

अमेरिकायाः सर्वोच्चन्यायालयस्य निर्णयेन डोणाल्ड्-ट्रम्पः इत्यस्मै अन्यः प्रमुखः विजयः प्रापितः, येन तस्य प्रशासनं सङ्घीय-कार्येषु व्यापक-ह्रासेन सह अग्रे गन्तुं अनुमतिम् अध्यगच्छत्। अयं निर्णयः निम्नन्यायालयस्य आदेशान् अतिक्रामयत्, ये ले-आफ्-इत्येतान् स्थगितवन्तः अपि च ये एलोन्-मस्क् इत्यस्य नेतृत्वे सर्वकारीय-कार्यक्षमताविभागेन प्रेरिताः सन्ति। ध्यानास्पदं वर्तते यत् सर्वोच्चन्यायालयेन सद्यः एव ट्रम्प्-प्रशासनस्य अनेकेषां कार्याणां समर्थनं कृतम्।

**नड्डा-तेलङ्गाणा**

केन्द्रीय-रसायन-उर्वरक-मन्त्री जे. पी. नड्डावर्यः तेलङ्गाना-सर्वकाराय कृषकाणां वास्तविकम् आग्रहम् पूरयितुं सर्वसमर्थनस्य आश्वस्तिम् प्रायच्छत् सहैव आवश्यकतानुगुणं यूरिया इत्यस्य आपूर्तिं सुनिश्चितं कर्तुं अधिकारिभ्यः आदेशम् अयच्छत् । ह्यः तेलङ्गाना-राज्यस्य मुख्यमन्त्री ए-रेवन्त-रेड्डी नवदिल्ल्यां श्री-नड्डां मिलितवान् यत्र तौ राज्ये उर्वरकाणाम् उपलब्धिविषये चर्चां कृतवन्तौ। उपवेशनावधौ, श्रीनड्डा राज्ये यूरिया इत्यस्य अत्यधिकस्य उपभोगस्य विषये अपि चिन्तां प्रकटितवान्, यत् मृत्तिकायाः दीर्घकालीनायाः अवस्थायाः कृते हानिकरम् अस्ति।

**महिला-क्रिकेट्**

भारतीय-महिला-दलं अद्य रात्रौ माञ्चेस्टर-नगरे ओल्ड्-ट्रैफर्ड्-ग्राउण्ड इत्यत्र इङ्ग्लेण्ड-दलं विरुध्य चतुर्थ-स्पर्धायां टी-विंशति-श्रृङ्खलां विजेतुं लक्ष्यम् साधयिष्यति। क्रीडास्पर्धा प्रातः एकादशवादने समारप्स्यते।

**।।इति वार्ता।।**